**प्रश्नः – चिपिटकचर्वणे रङ्गिण्याश्चरित्रं यथा चित्रितं तथा संस्कृतेन देवनागरलिप्या च वर्णयत।**

उत्तरम् – रङ्गिणी प्रकृतप्रहसनस्य नायकस्य कपालिनः भार्या। किन्तु तस्याः नायिकात्वेन निरूपणं कष्टाय इति वक्तुं शक्यते। इयम् अत्र प्रहसने पताकानायकत्वेन विवेचयितुं शक्यते। सा आरम्भतः एव कपालिना सह वर्तते। परोक्षतः सा प्रहसनस्य फलोदये कपालिनः साहाय्यम् आचरति।

एषा रङगिणी कपालिनः योग्या भार्या। सा पत्युः स्वभावं सम्यग् जानाति। कपाली यदा उद्बन्धनस्य रज्जुं याचते तदा सा सत्यम् एव रज्जुं पुरतः निक्षिपति। सा जानाति यत् कपाली वाक्शूरः। स यद् वा वदतु नाम , स्वस्य अनिष्टं कथम् अपि कर्तुं स न समर्थः।

पतिव्रता सा। पतिं सारमेयेण दष्टं दृष्ट्वा सा विचलिता भवति। झटिति मन्थरां वैद्यस्य आनयनाय प्रैषयत् सा। चिकित्सायै लौहशलाकां सङ्ग्रहीतुं गता यदा सा विफलमनोरथा प्रतिनिवर्तते तदा वैद्यम् अदृष्ट्वा सा तान्त्रिकम् आह्वयत् पत्युः चिकित्सार्थम्। अन्ते अपि सा जीवय मम पतिम् इति तान्त्रिकम् अन्वरुणत्। पत्युः जीवनरक्षायै चिपिटकचर्वणे अपि मतिमती जाता। वैद्येन सह तस्याः वार्तालापेन तस्याः पातिव्रत्यं स्फुटं प्रकाशते।

सा मृदुभाषिणी न, अपि च सा प्रगल्भा। यदा तु कपाली तस्याः रज्जुनिक्षेपं निन्दति तदा सा स्वपक्षं समर्थयन्ती गुरुजनाज्ञालङ्घने तस्याः मतिः नास्ति इति अवदत्। एतेन तस्याः परिहासप्रियता अपि ज्ञायते। पत्या तस्याः विषये ये आक्षेपाः कृताः सा निरन्तरं तेषाम् आक्षेपाणाम् उत्तरं प्रयच्छति। अतः प्रतिवादपरायणा अपि सा। सर्वम् अपि पत्युः अत्याचारं सा तूष्णीं न सहते।

सा देवद्विजशास्त्रेषु भक्तिमती। यदा कपाली तस्यां दास्याः प्रश्रयदानरूपम् आक्षेपं करोति तदा सा कथयति यद् नष्टचन्द्रदर्शनाद् एव तस्याम् इत्थं कलङ्कारोपः जातः इति। वैद्ये आगते सा अवगुण्ठनेन शिरः आवृणोति। तान्त्रिके आगते तं सा गुरो इति आह्वयति।

सा प्रगल्भा किन्तु न व्यवहारकुशला। अतः तान्त्रिकः यदा शर्करया क्षतं शोधयति तदा सा विस्मिता भवति। दासी मन्थरा कथयति यत् शर्करया क्षतशोधनं सा अपि जनन्याः ज्ञातवती। एवं प्रसिद्धं विषयम् अपि अजानत्याः तस्याः मुग्धता व्यवहारकुशलता च स्फुटा भवति।

सा स्वादुभोजनम् ईप्सति। चिपिटकस्य स्वादहीनतां निपुणं वर्णयन्त्याः तस्याः भोजनरुचिप्रियता ज्ञायते। तस्याः आत्मसम्मानप्रियता अपि द्रष्टव्या। यदा कपाली तस्याः न बिभेति इति कथयित्वा तान्त्रिकं तस्याः उपेक्षार्थं प्रचोदयति तदा सा गृहं त्यक्त्वा गच्छति। एतेन तस्याः आत्मसम्मानप्रियता प्रतिवादपरायणता च स्फुटं प्रतीयते। तदुक्तं दशरूपके –

"पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः।

तस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः॥ " इति।

पताकानायकस्य लक्षणम् उक्तम्। अत्र कपालिनः यथा चरितं तस्याम् अपि तादृशाः केचन गुणाः दृश्यन्ते एव। सा अपि वाक्चतुरा, आत्मसम्मानप्रिया, व्यवहारकुशला। कपाली अपि शर्करया क्षतशोधनं ज्ञात्वा तत् प्रयोक्तुं विस्मरति इति तस्य व्यवहारकुशलता ज्ञायते। रङ्गिणी विचक्षणा अपि। अतः पत्युः चिकित्सायौ यतते। पतिः यदा भृत्यं ताडयितुं प्रवर्तते तदा मुखे अङ्गुलिम् अर्पयित्वा ततः अपसर्पति। सा कपालिनः सहायार्थं यतते। कपालिनि तस्याः भक्तिः अपि स्फुटा। एवं रङ्गिण्यां पताकानायकस्य लक्षणानि सङ्गच्छन्ते।